# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| कक्षा -आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – १<br>(C.F.-4.1.1. Old & New )<br>*ग्रन्थ: वैदिकसाहित्येतिहास:* | |
|---|---|---|
| विषय: - अनिवार्यसंस्कृतम् | | गुणा: - ७० |
| दिनाङ्क: - १४/१२/२०१८ | | समय: -२.०० त: ०५.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधो निर्दिष्टाभ्याम् एकं सप्रमाणं विवेचयत ।** **( ५ )**

*(१) वेदस्य स्वत: प्रामाण्यं निरूपयत।*

*(२) वेदानां रचनाकालविषये प्राच्यपाश्चात्यमतानि विलिख्यन्ताम्।*

**प्रश्न: २** *यजुर्वेदस्य महत्वं प्रतिपादनपूर्वकं वैदिकजगति यज्ञस्य स्थानं किमस्ति विचारयत।* **( १० )**

*अथवा*

*ऋग्वेदस्य दार्शनिकं तत्त्वं विवेचयत।*

**द्वितीयान्विति:**

**प्रश्न: ३ अधो निर्दिष्टाभ्याम् एकं विवेचयत ।** **( ५ )**

*(१) शतपथब्राह्मणस्य वैशिष्टम्।*

*(२) शांखायनब्राह्मणम्।*

**प्रश्न: ४** *ब्राह्मणग्रन्थानां प्रतिपाद्यविषयं महत्त्वं च प्रतिपादयत।* **( १० )**

**अथवा**

*आरण्यकस्य परिभाषां स्पष्टयित्वा प्रमुखारण्यकग्रन्थानां संक्षिप्तपरिचयं लिखत।*

**तृतीयान्विति:**

**प्रश्न: ५ अधोनिर्दिष्टाभ्याम् एकं विवेचयत ।** **( ५ )**

*(१) छान्दोग्योपनिषद्।*

*(२) कठोपनिषद्।*

**प्रश्नः ६** *उपनिषदां प्रतिपाद्यम् आत्मतत्त्वं वर्णयत।* **( १० )**

**अथवा**

*आधुनिकसमाजस्य कृते यमनचिकेतसोः संवादस्योपयोगितां प्रतिपादयत।*

## चतुर्थान्वितिः

**प्रश्नः ७ निम्नलिखितयोरेकस्य प्रतिपादनं कुरुत ।** **( ५ )**

*(१) कल्पः।*

*(२) व्याकरणम्।*

**प्रश्नः ८** *वेदाङ्गेषु ज्योतिषवेदाङ्गस्य स्थानं निरूपयत।* **( १० )**

**अथवा**

*वेदार्थज्ञानाय निरुक्तशास्त्रस्य योगदानं विवेचयत।*

**प्रश्नः ७ दशप्रश्नानां एकैकवाक्यद्वारा उत्तरं लिखत ।** **( १० )**

*(१) 'वेदः' इति शब्दस्य का व्युत्पतिः?*

*(२) ऋक् शब्दस्य कोऽर्थः?*

*(३) सामवेदस्य मुख्यप्रतिपाद्यविषयः कः अस्ति?*

*(४) 'तत्त्वमसि' इति वचनं कस्याः उपनिषदः ?*

*(५) ईशोपनिषदः सम्बद्धः केन वेदेन सह वर्तते ?*

*(६) शुक्लयजुर्वेदस्य ब्राह्मणग्रन्थः कः ?*

*(७) कतिविधः स्वरः?*

*(८) वेदपुरुषस्य हस्तौ किं वेदाङ्गं गण्यते?*

*(९) कल्प-वेदाङ्गस्य कोऽर्थः ?*

*(१०) ऋग्वैदिकदेवतानां संख्याः कः ?*

*(११) ऋग्वेदे कति मण्डलानि सन्ति ?*

*(१२) होतायाः सम्बद्धः केन वेदेन सह वर्त्तते ?*

*(१३) सामवेदस्य ऋत्विक् कः?*

*(१४) यजुर्वेदस्य प्रतिपाद्यो विषयः कः?*

*(१५) अथर्ववेदे कति मन्त्राः?*

--oo--